# श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीतृतीयवर्षम् (SEM- 5) **प्रश्नपत्रम्** – ७ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड** – **CE 3.5.9.** **समयः** - १० तः ०१

**दिनाङ्कः** - ११/१२/२०१८ **सन्दर्भग्रन्थः** – काव्यमीमांसा

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नेषु द्वयोः व्याख्यां लिखत।** **१०**

(१) तं च सर्वसमयविदं दिव्येन चक्षुषा भविष्यदर्थदर्शिनं भूर्भुवःस्वस्त्रितयवर्त्तिनीषु प्रजासु हितकाम्यया प्रजापतिः काव्यविद्याप्रवर्त्तनायै प्रायुङ्क्त।

(२) इह हि वाङ्मयमुभयथा शास्त्रं काव्यं च । शास्त्रपूर्वकत्त्वात् काव्यानां पूर्वं शास्त्रेष्वभिनिविशेत। नह्यप्रवर्तितप्रदीपास्ते तमसि तत्त्वार्थसार्थमध्यक्षयन्ति।

(३) विद्यास्थानानां गन्तुमन्तं न शक्तो
जीवेद्वर्षाणां योऽपि साऽग्रं स्हस्रम्।
तस्मात् संक्षेपादर्थसन्दोह उक्तो
व्यासः सन्त्यक्तो ग्रन्थभीरुप्रियार्थम्॥

**प्रश्नः – २ काव्यमीमांसानुसारं पौरुषेयवाङ्मयस्य परिचयं लिखत।** **१०**

**अथवा**

**राजशेखरस्य परिचयं लिखित्वा तस्य वैशिष्ट्यं लिखत।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ निम्नेषु द्वयोः व्याख्यां लिखत।** **१०**

१. तयोर्बुद्धिमान् सुश्रूषते गृह्णीते धारयति विजानात्यूहतेऽपोहति तत्त्वं चाऽभिनिविशते।
आहार्यबुद्धेरप्येत एव गुणाः किन्तु प्रशास्तारमपेक्षन्ते।

२. बुद्धिमत्त्वं च काव्याङ्गविद्यास्वभ्यासकर्म च
कवेश्चोपनिषच्छक्तिस्त्रयमेकत्र दुर्लभम्॥

३. वाग्भावको भवेत्कश्चित्काश्चिद्हृदयभावकः।
सात्त्विकैराङ्गिकैः कश्चिदनुभावैश्च भावकः॥

**प्रश्नः – ४ काव्यमीमांसानुसारं भावकानां निरूपणं कुरुत** **१०**

**अथवा**

**काव्यकर्मणि समाधेः अभ्यासस्य च महत्त्वं यथाग्रन्थं प्रतिपादयत।**

## तृतीयान्विति:(Unit - 3)

**प्रश्न: – ५ निम्नेषु द्वयो: व्याख्यां लिखत।** **१०**

१) अव्युत्पत्तिकृतो दोष: शक्त्या संव्रियते कवे:।
यस्त्वशक्तिकृतस्तस्य झटित्येवावभासते॥

२) प्रतिभाव्युत्पत्ती मिथ: समवेते श्रेयस्यौ इति यायावरीय:, न खलु लावण्यलाभादृते रूपसम्पदृते रूपसम्पदो वा लावण्यलब्धिर्महते सौन्दर्याय।

३) आवापोद्धरणे तावद्यावद्दोलायते मन:।
पदानां स्थापिते स्थैर्ये हन्त। सिद्धा सरस्वती॥

**प्रश्न: – ६ काव्यमीमांसानुसारं अष्टविधकाव्यकवे: निरूपणं कुरुत।** **१०**

**अथवा**

**काव्यकर्मणि प्रतिभाया: महत्त्वं प्रतिपादयत।**

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्न: – ७ निम्नेषु दशानां लघूत्तराणि लिखत।** **१०**

१) काव्यमीमांसाया रचयिता क: ?
२) शास्त्रनिर्देश: इति: कस्याध्यायस्य नाम ?
३) रूपकनिरुपणीयं क: अधीतवान् ?
४) यजूंषि किंलक्षणानि?
५) कस्मादलङ्कार: सप्तममङ्गम् ?
६) कै: सह परिचय: अमृतायते ?
७) कस्य सर्वत्र मतिविपर्यास: भवति ?
८) प्रतिभा कतिविधा ?
९) भावकस्य उपकुर्वाणा प्रतिभा का ?
१०) अरोचकिता कतिविधा ?
११) आचार्याणां मते व्युत्पत्ते किं लक्षाणाम् ?
१२) अशक्ति: कया संव्रियते ?
१३) शब्दकवि: कतिविध: ?
१४) योऽनवद्यं कवते न तु प्रबध्नाति स: क: कवि: ?
१५) काव्यपाक: कतिविध: ?

*****************